# A-III/1/22AMIS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. शब्दलक्षणे शास्त्रपदस्य किमौचित्यम्?
2. प्रत्यक्षाद्युपयोगः कुत्रोपयुज्यते?
3. शब्द इति शब्दः किमभिधत्ते?
4. लोके अर्थप्रतिपत्तौ का सरणिराश्रयणीया?
5. 'जर्भरीतुतुर्फरीतु' इत्यादिशब्दानामर्थव्यवस्थायां को नियमः?
6. न्यायमते उपमानं किमुच्यते?
7. प्रमाणद्वयवादिनं प्रदर्शयत।
8. गवयज्ञानोत्पत्तौ कीदृशी प्रक्रिया समाश्रयणीया?
9. अर्थापत्तिः दृष्टविषया उत अदृष्टविषया?
10. 'अत्रह्येवावपन्तीति' कस्य विधेः सम्बन्धः?
11. "प्रमाणानामनुत्पत्तेः न चाभावस्य धर्मता" इतीदं व्याख्यात।
12. शब्दार्थयोः सम्बन्धः कीदृशः?
13. आकृत्या किं निरूप्यते?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्फोटवादं निराकुरुत।
15. सम्बन्धाक्षेपवादं विवृणुत।

16. उपमानस्य अनुमानान्तर्भावं खण्डयत।

17. अभावस्य प्रामाण्यं साधयत।

18. अर्थापत्तेः स्वरूपं भेदान् च वर्णयत।

19. "न च शृङ्गादयो यत्र तत्र तत्र गौरनुमीयते" कुतः?

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. शब्दप्रमाणं निरूपयत।

21. चित्रोक्षेपवादं निरूपयत।

22. अर्थापत्तेः अनुमानान्तर्भावं निराकृत्य पृथक् प्रामाण्यं स्थापयत।

# A-III/2/22AMIS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अपोहवादिनः परीक्षकाः के?
2. गोशब्दवाच्यं किमुदाहरणं प्रदर्श्यते?
3. "शाबलेया गौः बाहुक्तेया गौ" इत्यादौ को विशेषः?
4. सदसदात्मकं वस्तु कथं प्रतीयते?
5. सास्नादिभिः किं विशिष्यते?
6. वृक्षवनयोः को वा भेदः?
7. कः संज्ञासंज्ञिसम्बन्धः?
8. सर्गादौ क्रिया कुतः नेष्यते?
9. पुरुषो हि न कस्यचित्कर्ता" इति के वदन्ति?
10. कर्मसङ्करः कथं भवेत्?
11. नित्यनैमित्तिकयोरनुष्ठानं किं निमित्तमनुष्ठयेम्?
12. चित्रादीनां फलं कुत्र क्षीयते?
13. वेदान्तनिषेवणेन किं प्रयाति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. "अपोह्यमाने चाभावे भाव एवावशिष्यते" व्याख्यात।

15. "असम्बद्धमिदं वचनमुपन्यस्तम्" इति सप्रसङ्गं व्याख्यात।
16. "द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिः" इति विवृणुत।
17. "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति व्याख्यात।
18. सृष्टिप्रलयविषये वैशेषिकमतमुपस्थापयत।
19. वनवादस्य स्वरूपं वर्णयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अपोहवादं खण्डयत।
21. कर्मणां वैविध्यं विवृणुत।
22. आत्मवादः निरूप्यताम्।

# A-III/3/22AMIS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. धर्माधर्मौ क्रियारूपाविति के प्राहुः?
2. विवाहादौ अनृतवादस्य अदोषत्वं कथम्?
3. श्येनस्य यागनामत्वं सप्रमाणं विवृणुत।
4. हिंसानिषेधशास्त्रं वर्णयत।
5. अभ्यनुज्ञाविधिं सोदाहरणं व्याख्यात।
6. 'कन्या ते गर्भिणी' 'पुत्रस्ते जातः' इत्यादौ वाक्यार्थबोधः कथम्?
7. यागगतश्रेयस्साधनत्वस्य वेदबोध्यत्वं कथम्?
8. धात्वर्थस्य भावनायामन्वयप्रकारः कः?
9. प्रयाजादीनां भावनान्वयप्रकारं लिखत।
10. अधर्मेऽपि श्येने आस्तिकानामप्रवृत्तिः कुतः?
11. आप्तत्वनिर्वचनं प्रदर्शयत।
12. वैयाकरणानां मते कः प्रत्ययार्थः?
13. किमिदं नाम प्राशस्त्यम् अप्राशस्त्यं वा?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. अंशत्रयोपेतां शाब्दीभावनां व्याख्यात।
15. लिङर्थे तार्किकाणामभिप्रायं निरूपयत।

16. इष्टसाधनत्वं लिङर्थ इति मतं खण्डयत।
17. 'इच्छासाधारणी विषयिता शब्दधर्मः' इति पक्षमनुवदत।
18. आख्यातवाच्यसंख्यायाः अन्वयप्रकारं निरूपयत।
19. निषेधवाक्येषु लिङ्र्थं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. धर्मलक्षणं परिष्कुरुत।
21. मतान्तरनिरासपूर्वकं लिङर्थं वर्णयत।
22. भावनामुख्यविशेष्यत्वे युक्तिविशेषं दर्शयत।

# A-III/4/22AMIS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. स्मृतिरिति व्यवहारः कुत्र क्रियते?
2. स्वप्नः किंरूपः? सः यथार्थः उत न?
3. पञ्चप्रमाणवादिनः के? कानि तानि प्रमाणानि?
4. द्रव्यपरतन्त्रस्वभावाः के? कश्च स्वतन्त्रः?
5. किं नाम स्वार्थानुमानम्?
6. ‘परार्थानुमानं त्र्यवयवम्’, के ते अवयवाः?
7. अनुमानार्थापत्योः को भेदः?
8. शाब्दी आकाङ्क्षा केन पूर्यते?
9. भूतलादीनामवगतिः कथं भवति?
10. तमः किंरूपम्?
11. गुणाः के?
12. “शब्दः औत्पत्तिकः”, कथम्?
13. “पदान्येव वाक्यम्, पदार्थ एव वाक्यार्थः”, कथम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. ‘रजतज्ञानं न शुक्तिगोचरम्’ तथापि प्रवृत्तिः कथम्?

15. प्रमाणलक्षणं परिष्कृत्य प्रमाणविभागं प्रदर्शयत।
16. वर्णानां नित्यत्वं साधयत।
17. मोक्षविषयमुपवर्णयत।
18. अभावप्रमाणं निराकुरुत।
19. वाक्यानां कार्यार्थपरत्वं साधयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. विध्यर्थम् उपवर्णयत।
21. अपूर्वस्य वैयर्थ्यमापाद्य तत् खण्डयत।
22. मीमांसायाः प्रयोजनं, धर्मजिज्ञासारम्भस्य समर्थनं च कुरुत।